पुरस्यैव भैरवः। दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते"। इति शक्तिरत्नाकरतन्त्रम्। "अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्। ऊर्द्ध्वकेशो व्योमकेशी नीलकण्ठोवृषध्वजः। दिव्यौघान् सिद्धिदान् वत्स! शृणुष्वावहितो मुदा"। "शृणु वत्स! महादेव! गुरून् दुर्गामनूद्भवान्। परमात्मा परानन्दः परमेष्ठी शुभोदयः। कृष्णकाल! कालनाथो दिव्यौघा भैरवादिकाः" तन्त्रसारे देवताभेदात्तद्भेदा उक्ता २रुचिरौषधौ च

**दिव्यौषधि** स्त्री नित्यकर्म०। १मनःशिलायाम् शब्दार्थचि०।

**दिश** दाने आज्ञापने कथने च तु०उभ०सक०अनिट्। दिशति ते अदिक्षत् न दिदेश देष्टा दिष्टः दिष्टिः। दिष्ट्वा आदिश्य "साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः" मनुः। दाने "दृष्टां गतिं तस्य सुरा दिशन्ति" भा० आनु०१८४२श्लो० आज्ञापने "महादेवेन दिष्टं ते पुत्रजन्म नराधिप!" भा० व० १०६अ०। "दिदेश तस्मै प्रयतां तनूजाम्" कुमा०।

अति+स्वविषयसम्बन्धान्यविषये उपदेशे सक० अतिदेशशब्दे १००पृ०दृश्यम्। "यथाकालोपपाते तद्दैवते तद्दैवतं हुत्वा तद्वातिदिश्यमानेन जुहुयात्" कात्या०श्रौ० २५। २।४ उपदेशे च। "इत्यर्चितः स भगवानतिदिश्यात्मनः पदम्" भाग०४।६।२८।

अनु+पश्चात्कथने। "यज्ञं देवेभ्योऽनुदिशति" तैत्ति० सं० १।५।४।२ "रामस्याप्यनुदिश्यताम्" रामा०लङ्का०८६स०

अप+छलने यथार्थाह्नवे अपदेशशब्दे दृश्यम्। "पश्चिमक्रतुविदा पुरोधसा रोगशान्तिमपदिश्य मन्त्रिणः। संस्कृते शिखिनि गूढमादधुः" "तस्य निर्दयरतिश्रमालसाः सिक्तकृत्यमपदिश्य पार्श्वगाः" रघुः।

वि+अप+संज्ञाभेदे "भ्रातरं राजराजानं महेश्वरसखं प्रभुम्। धनेश्वरं व्यपदिशन्" भा०व०२८०अ०। "मित्रं च मां व्यपदिशस्यपरं च यासि" मृच्छक० "ईश्वर इति व्यपदिश्यते" वेदा०सा० "निमित्तसद्भावाद्विशिष्टोऽपदेशोऽमुख्यव्यवहारोव्यपदेशः" परिभाषेन्दुशेखरोक्तेऽर्थे।

अभि+अभिमुखीकृत्योपदेशे। "यां यामभ्यदिशत् सैनमकामयत" पञ्चविंशब्रा० १२।११।

आ+आज्ञायाम् उपदेशे "अथात आदेशो नेति" वृ०उ० "आदिक्षदादोसकृयानुकल्पम्" भट्टिः। आदेशशब्दे ११९ पृ० उक्ते अर्थे च "धातोः स्थाने इवादेशम्" रघुः।

अनु+आ+पश्चादादेशे उपदेशे च अन्वादेशशब्दे २१६ पृ० उक्ते अर्थे च।

प्रति+आ+निराकरणे "प्रत्यादेशो निराकृतिः" अमरः "ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा" "अन्तः शरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता" रघुः "किमहमेतं जलधरसमयं न प्रत्यादिशामि" विक्र०

वि+आ+विशेषेणादेशे। "समीरणः प्रेरयिता भवेति व्यादिश्यते केन हुताशनस्य" कुमा०

सम्+आ+सम्यगादेशे। "समादिदेशैकवधूर्भवित्री" कुमा०।

उद्+स्वरूपकथने "उद्देशोलक्षणं विभागः परीक्षा चेति" न्यायसमयः। उद्देशशब्दे ११७०उक्तेऽर्थे च। तच्छब्दे उदा० प्रश्ने उद्देशकशब्दे दृश्यम्।

उप+अनुशासने उपदेशशब्दे १२१० पृ०उक्तेऽर्थे च। "उपदिशति कामिनीनां यौवनमद एव ललितानि" सा०द० "उपदिष्टमिहेच्छामि तापस्यं वीतकल्मषाः" भा०उ०१७४अ०

प्रति-उप+उपदेशस्य प्रतिरूपोपदेशे "व्याधिं प्रति प्रत्युपदेक्ष्यामः" सुश्रु० "यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै। तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे बाला" माल०मि

निर्+निर्णयेन देशने कथने च "अतुषत् पीठमासन्नं निरदिक्षच्च काञ्चनम्" भट्टिः उच्चारणे च "निर्दिश्यमानस्यादेशा भवन्ति" व्या०परिभाषा "षष्ठ्यन्तं निर्दिश्यमानमुच्चार्यमाणम्" नागेशभट्टः।

प्रति+निर्+प्रकृतानुरूपनिर्देशे। "तदिति प्रकृतं भावलक्षणं प्रतिनिर्दिश्यते"। येन पदेन उद्देशस्तेनैव पदेन पुनःकथने। उद्देश्यप्रतिनिर्देश्ययोरेकपदप्रतिपाद्यत्वेऽपि न कथितपदत्वदोषः अन्यपदेन निर्देशे तु प्रत्युत भग्नप्रक्रमतादोषः यथाह सा०द० "एवमुक्तो मन्त्रिमुख्यैरावणः प्रत्यभाषत" अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितं तेन रावणः प्रत्यवोचतेति पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात्। इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देश्यत्वं यथा

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र। यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति। यथा वा

"ते हिमालयमामन्त्र्य पुनःप्रेक्ष्य च शूलिनम्। सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः" अत्र अस्मै